मनीषिणः। यदुपास्तिमसावत्र परमात्मा निरूप्यते” कुसु०।

**उपास्त्र** न० उपगतमस्त्रम् उपकरणत्वेन अत्या०स०। अस्त्रोपकरणे तूणादौ”। “राजानौ नीतिमार्गरतौ अस्त्रोपास्त्रकृतिनौ भा०व०१८६अ०।

**उपास्य** त्रि० उप+आस—सेवनार्थत्वात् कर्मणि ण्यत्। १सेवनीये २चिन्तनीये “पुत्रवच्च ततो रक्ष्या उपास्या गुरवच्च ते” भा०अनु०८अ०।“गङ्गा सदैवात्मवशैरुपास्या” भा०अनु० २६अ०। उप+आस—ल्यप्। ३सेवयित्वेत्यर्थे ४चिन्तयित्वेत्यर्थे च अव्य०। ४उपास्य सन्ध्यां विधिवत्” स्मृतिः।

**उपाहित** पु०उप आसन्नमहितं यतः। १उल्कापातादौ अग्न्युत्पातरूपे उपद्रवे उप+आ—धा-क्त। २आरोपिते, त्रि०

**उपेक्ष** पु०गान्दिनीसुते अक्रूरभ्रातृभेदे। “अक्रूरः सुषुवे तस्मात् श्वफल्कात् भूरिदक्षिणः। उपमद्गुस्तथा मद्गुर्मृदरश्चारिमेजयः। अविक्षिपस्तथोपेक्षः शत्रुघ्नोऽथारिमर्द्दनः” हरि० २५तत्रैव ३८अध्याये च गान्दिनीसुतत्वमस्योक्तम्

**उपेक्षक** त्रि०उप+ईक्ष—ण्वुल्। उपेक्षाकारके योगिनि “उपेक्षकोऽसङ्कुसुको मुनिर्भावसमन्वितः” मनुः “दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरता त्वन्या” सां०का०

**उपेक्षण** न०उप+ईक्ष—भावे ल्युट्। १त्यागे २औदासीन्ये च ३राज्ञां सप्तविधोपायान्तर्गते उपायभेदे “साम्ना दानेन भेदेन दण्डेनोपेक्षणेन च” भा० व० १५०। उपेक्षणस्य यथोपायत्वं तथा उपायशब्दे उक्तम्।

**उपेक्षणीय** त्रि०उप+ईक्ष—अनीयर्। १त्याज्ये २प्रतीकारार्थमनालोचनीये च “नश्यत् पुरस्तादनुपेक्षणीयम्” रघुः।

**उपेक्षा** स्त्री उप+ईक्ष—अ। १त्यागे इदं न मम स्यादिति इच्छाभेदे ३औदासीन्ये ४अनपेक्षणे च। उपेक्षा च परस्वत्वानभिसन्धानापूर्वकस्वत्वप्रागभावासमानकालीनस्वत्वाविषयकेच्छा। उपेक्षायाः स्वत्वनाशकत्वम् स्मृतौ व्यवस्थापितम् “उपेक्षानात्मक स्तत्र निश्चयः कारणं भवेत्” भाषोक्ते ५इदमुपादेयं न भवतीत्याकारकज्ञानभेदे च “कुर्यामुपेक्षां हतजीवितेऽस्मिन्” रघुः। ६योगशास्त्रोक्ते चित्तप्रसादनार्थभावनाचतुष्टयान्तर्गते भावनाभेदे। “मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्” पात०सू०

**उपेत** त्रि०उप+इण—क्त। १उपगते २समीपगते सेवादिधर्मेण ३प्राप्ते ४उपनीते च। “यं प्रव्रजन्तमनुपेतमपेतकृत्यम्” भा०१स्क०। “न स्त्री जुहुयान्नानुपेतः” स्मृतिः। “अनुपेतः अनुपनीतः” म०त०रघु०। गर्भाधानार्थं ५स्त्रियमुगते च ‘गर्भाधानमुपेतो ब्रह्मगर्भं सन्दधाति” हारीतः “उपेतः स्त्रियमुपगतः” सं०त०रघुनन्दनः।

**उपेन्द्र** पु०उपगत इन्द्रम् अनुजत्वात् अत्या०स०। १विष्णौ। स हि कश्यपात् अदितौ इन्द्रादनन्तरं वामनरूपतया संजातः इति तस्य तथात्वम्। “उपेन्द्रो वामनः प्रांशुः” विष्णुस०। अत्र भाष्ये अन्यापि निरुक्तिर्दर्शिता यथा। “ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वरः। उपेन्द्र इति कृष्ण! त्वां गास्यन्ति दिवि देवताः” इति हरिवंशवचनात् उपरि इन्द्रः उपेन्द्रः” इति। अत्र वासुदेवस्यैव यथोपेन्द्रनामता, तथा गोवर्द्धनोद्धारणेन गोषु रक्षितासु तत्प्रीतये गोभिस्तस्य सर्वोपरिलोकस्थितत्वेन उपेन्द्रनामतयाऽभिषेकः कृत इति वर्णितं हरिवं० ७६अ० यथा। “अपामधस्ताल्लोकोऽयं तस्योपरि महीधराः। नागानामुपरिष्टाच्च पृथिव्युपरि मानुषाः। मनुष्यलोकादूर्द्ध्वं तु खगानां गतिरुच्यते। आकाशस्योपरि रविर्द्वारं स्वर्गस्य भानुमान्। देवलोकः परस्तस्माद्विमानगमनो महान्। यत्राहं कृष्ण! देवानामैन्द्रे विनिहितः पदे। स्वर्गादूर्द्ध्वं ब्रह्मलोको महर्षिगणपूजितः। तत्र सोमगतिश्चैव ज्योतिषाञ्च महात्मनाम्। तस्योपरि गवां लोकः साध्यास्तं पालयन्ति हि। स हि सर्वगतः कृष्ण! महाकाशगतो महान्। उपर्युपरि तत्रापि गतिस्तव तपोमयी। यां न विद्म वयं सर्वे पृच्छन्तोऽपि पितामहम्। लोकास्त्वधो दुष्कृतिनां नागलोकस्तु दारुणः। पृथिवी कर्मशीलानां क्षेत्रं सर्वस्य कर्मणः। खमस्थिराणां विषयो वायुना तुल्यवर्त्तिनाम्। गतिः शमदमाढ्यानां स्वर्गः सुकृतकर्मणाम्। ब्राह्मे तपसि युक्तानां ब्रह्मलोकः परा गतिः। गवामेव तु गोलोको दुरारोहा हि सा गतिः। स तु लोकस्त्वया कृष्ण! सीदमानः कृपात्मना। धृतो धृतिमता वीर! निघ्नतोपद्रवं गवाम्। तदहं समनुप्राप्तो गवां वाक्येन नोदितः। ब्रह्मणश्च महाभाग! गौरवात्तव चानघ!। अहं भूतपतिः कृष्ण! देवराजः पुरन्दरः। अदितेर्गर्भपर्याये पूर्व्वजस्ते पुरातनः। तेजस्तेजस्विनश्चैव यत्ते दर्शितवानहम्। मेघरूपेण तत्सर्वं क्षन्तुमर्हसि मे विभो!। एवं क्षान्तमनाः कृष्ण! स्वेन सौम्येन तेजसा। ब्रह्मणः शृणु मे वाक्यं गवाञ्च गजविक्रम!। आह त्वां भगवान् ब्रह्मा गावश्चाकाशगा दिवि। कर्मभिस्तोषिता दिव्यैस्तव संरक्षणादिभिः। भवता रक्षिता लोका गोलोकस्य महानयम्। तदयं पुङ्गवैः सार्द्धं वद्धीसः प्रसवैस्तथा। कर्ष-